# Saptajina Stava

# सप्तजिनस्तवः

## Document Information

Text title : Saptajina Stava

File name : saptajinastavaH.itx

Category : misc, buddha, stava, aShTaka

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# सप्तजिनस्तवः

जगद्गुरुं सुरनरलोकपूजितं कृपापटुं परहितमोक्षदेशकम् ।
विपश्यिनं त्रिभवमहौघसारगं नमामि तं सुगतगतिं तथागतम् ॥ १॥

अनन्तपारे भवसागरेऽस्मिन् निमज्यमानं प्रसमीक्ष्य लोकम् ।
प्रकाशितो येन हिताय धर्मो नमोऽस्तु तस्मै शिखिने जिनाय ॥ २॥

वन्दे विश्वभुवं बुद्धं चन्द्रार्काधिकतेजसम् ।
सागरौघमिवागाधं ज्ञानेन विनयेन च ॥ ३॥

यस्येन्दुरश्मिप्रतिमैर्यशोभिरलङ्कृता भाति वसुन्धरेयम् ।
औदुम्बरं पुष्पमिवाद्भुतं तं वन्दे ककुप्छन्दमहामुनीन्द्रम् ॥ ४॥

विसारिणा विगतमलेन चेतसा विरागिणा सततहितानुकारिणा
हतं तमो विगतमलेन येन तं सुरार्चितं कनकमुनिं नमाम्यहम् ॥ ५॥

प्रतप्तचामीकररश्मिगौरं सहस्रसूर्याधिकदीप्ततेजसम् ।
लोकोत्तमं सर्वजनाभिवन्द्यं वन्दाम्यहं काश्यपनामधेयम् ॥ ६॥

वाक्यांशुजालैः प्रतिबोध्य लोकं सूर्यांशुजालैरिव पद्मषण्डम् ।
यो निर्वृतः शाक्यमुनिप्रदीपस्तस्मैः नमः परमकारुणिकाय शास्त्रे ॥ ७॥

मैत्रेयनामा तुषितालयस्थो यस्यैकजन्मान्तरिता हि बोधिः ।
उत्पत्स्यते यः सुगतः पृथिव्यां सर्वात्मनाऽहं प्रणतोऽस्मि तस्मै ॥ ८॥

स्तुत्वा मया सप्तजिनानतीताननागतं चाष्टमबोधिसत्त्वम् ।
यत्पुण्यमासादितप्रमेयं निरामयास्तेन भवन्तु सत्त्वाः ॥ ९॥

इति श्रीसप्तजिनस्तवः समाप्तः ॥

*Saptajina Stava*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*